# इयम् आकाशवाणी

दिनाङ्क :- 14.06.2024 सायम् - 06:20

**मुख्यवार्ता:**

- प्रधानमंत्री श्री नरेन्द्र मोदी इटली देशे जी-7 इति शिखर सम्मेलनात् पृथक् विभिन्नानां देशानाम् नेतृभि: समं समाचरिष्यति द्वि पक्षीय उपवेशनानि ।
- सिक्किम-राज्ये अतिवृष्टि: कारणात् जाते भूस्खलने षट्जना: मृत्युमुपगता: अथ प्राय: द्विसहस्र पर्यटका: अवरुद्धा: जाता:।
- ऋतु विज्ञानविभागेन उपहिमालयी पश्चिम बंगाल-असम-मेघालय-सिक्किम पूर्वोत्तर भारतस्य अन्येषु क्षेत्रेषु जूनमासस्य एकोनविंशे दिनाङ्के अतिवृष्टे: सम्भावना कृता ।
- गतदिने अमरीका-यूक्रेन देशाभ्यां दीर्घकालिक-सुरक्षा-सन्धि: विहित:।
- पंचदिवसीया वार्षिकी हज यात्रा अद्यारभ्य प्रारब्धा। प्राय: विंशति: लक्ष पर्यटका: सऊदी अरबस्य मीनायां एकत्रिता: भवन्ति।

**जी-7**

जी-7 इति शिखरे सम्मेलने सहभागितां समाचरितुं इटली देशं प्राप्तस्य प्रधानमन्त्रिण: नरेन्द्रमोदिन: भव्यं स्वागतं समाचरितम्। तावत् प्रधानमन्त्री तत्र ग्लोबल साउथ इति विकास जलवायु परिवर्तन सन्निवेशोपक्रमेषु स्वीयं मन्तव्यं प्रस्तोष्यति। अवधेयं यत् जी-7 इति देशै: समं भारतस्य सुदृढा: सम्बन्धा: सन्ति। गतपंचवर्षत: भारतं प्रतिवर्षम् एतस्मिन् शिखर सम्मेलने सहभागित्वं भजते। भवद्भि: ज्ञेयं यत् जी-7 इति जगत: सप्त सुदृढ विकसित देशानां समूह: अस्ति यस्य सदस्येषु कनाडा, फ्रांस, जर्मनी, जापान, ब्रिटेन, संयुक्त राज्य अमरीका सप्त देशा: सम्मिलिता: सन्ति। तावत् प्रधानमन्त्री मोदी तत्र इटली देशे जी-7 इति शिखर सम्मेलनात् पृथक् अनेकेषां देशानां नेतृभि: समं द्विपक्षीय उपवेशनानि अपि समाचरिष्यति। जी-7 इति शिखर सम्मेलने सहभागितां कर्तुं प्राप्त: प्रधानमन्त्री नरेन्द्र मोदी समाजिके संचारपटले अलिखत् यत् जी-7 इति शिखर सम्मेलने सहभागितार्थं अहं इटली देशं प्राप्तवान्, वैश्विक नेतृभि: समं चर्चायां सम्मिलितुं समुत्सुक: अस्मि। अस्माकं लक्ष्यं सम्मिल्य वैश्विक समाह्वानानां समाधानम् अथ उज्ज्वल-भविष्यार्थं अन्ताराष्ट्रिय सहयोग समेधम् अस्ति। तावत् इटली देशे जी-7 शिखर सम्मेलनस्य गत दिने समारम्भ: संजात:। इटली देशे आयोज्यमानस्य एतस्य शिखर सम्मेलनस्य प्रथमे दिने राउण्ड टेबल इति समूह विशेष सम्मेलनं समायोजितं गतम्। अत्रान्तरे इटली देशस्य प्रधानमन्त्री इटली देशस्य प्रधानमन्त्री पदासीना ज्योर्जिया मेलोनी इत्येषा अवोचत् यत् एतस्य शिखर सम्मेलनस्योद्देश्यं ऐक्य स्थापनं सम्मिल्य कार्याचरणमस्ति। अथ जी-7 इति सदस्य देशा: सम्मिल्य एव अग्रे सरिष्यन्ति उत्कर्षतां च प्राप्स्यन्ति।

**सिक्किम**

सिक्किम-राज्ये अतिवृष्टया: कारणात् भूस्खलनं अभवत्। भूस्खलनस्य कारणेन मंगल-जनपद: विनष्ट: यत्र न्यनातिन्यूनं षट् जना: मृता: द्वी सहस्त्रं पर्यटका: च अवरुद्धा: जाता:। तीस्ता नद्या: जलस्तरस्य वर्धनेन संकलंग-क्षेत्रे पुरातन: लटकनसेतु: नवनिर्मित: बेली-सेतु: च जले पतितौ। येन उत्तर-सिक्किम-राजस्य जोन्धु-प्रदेशेन सह महत्वूर्ण: सम्पर्क: खण्डित:। मंगल-जनपदे अधिकारिणा हेम-कुमार-छेत्री इत्यनेन वृष्टया कारणात् जातस्य क्षते: आकलनं कृतम्।

## ऋतु-विज्ञान

ऋतु विज्ञानविभागेन उपहिमालयी पश्चिम बंगाल-असम-मेघालय-सिक्किम पूर्वोत्तर भारतस्य अन्येषु क्षेत्रेषु जूनमासस्य एकोनविंशे दिनाङ्के अतिवृष्टे: सम्भावनाया: अनुमान: कृत:। भारतीय ऋतुविज्ञान विभागानुसारेण देशस्य उत्तरभागेषु उष्णता निरन्तरं भविष्यति। अद्य झारखण्ड-बिहार-उत्तर प्रदेश समेत्य उत्तर भारतस्य कतिपय भागेषु रेड अलर्ट इति संचेतना प्रकटिता। ऋतु विज्ञान विभागस्य वैज्ञानिका डॉक्टर-सोमा-सेन: आकाशवाण्या: वार्ताहरै: सह संवादं कुर्वती उक्तवती यत् अद्य झारखंड-बिहार-उत्तरप्रदेशे रेड अलर्ट इत्यस्य सालं उष्मावायो: प्रकोप: निरंतरं भविष्यति।

## अमरीका-यूक्रेन

अमरीका-यूक्रेन देशाभ्यां ह्य: इटली देशे दीर्घकालिक-सुरक्षा-सन्धि: विहित:। जी-7 शिखर-सम्मेलनं विहाय देशस्य राष्ट्रपति जो बाइडेन, यूक्रेन देशस्य राष्ट्रपति: वोल्दोमिर जेलेंस्की च अस्मिन् सन्धौ हस्ताक्षरं कृतवन्तौ। अनेन द्वयो: देशयो: मध्ये सैन्य-उपकरण, प्रशिक्षण, युद्धाभ्यास सहैव सर्वेऽपि संभावित स्तरेषु सहयोग: वर्धयिष्यते।

## हज

पंचदिवसीया वार्षिकी हज यात्रा अद्यारभ्य प्रारब्धा। प्रया: विंशति: लक्ष पर्यटका: सऊदी अरबस्य मीनायां एकत्रिता: भवन्ति। अद्य तावत् भारतस्य पंचसप्तसहस्त्राधिक एकलक्षाधिक पर्यटका: भागं गृह्णन्ति। एतेषु विंशति: अधिक चत्वारिंशत् सहस्त्रोत्तर एकलक्ष पर्यटका: हज कमेटी ऑफ इण्डिया इत्यस्य माध्यमेन तत्र प्राप्तवन्त:। तीर्थयात्रिण: यात्राया: आरम्भ: मक्कात: कृत्वा मीनायां एकत्रिता: भवन्ति। जनानां सुविधायै (हजसुविधा) इति दूरभाष यन्त्र: प्रदत्त:।

## कुवैत अग्निदुर्घटना

कुवैत देशे दुरापन्नायां अग्निकाण्ड दुर्घटनायां मृत्युंगतानां पंचचत्वारिंशत् भारतीयानां पार्थिवं शरीरं आदाय वायु सेनाया: एकं विशिष्टं विमानं कोचीन अंतर्राष्ट्रीय विमान स्थानकं प्राप्तवत्। पार्थिव शरीराणि कार्गो स्वागत क्षेत्रे स्थापितानि येन जना: तेभ्य: श्रद्धांजलिं दातुं शक्येयु:। विदेश राज्य मन्त्री कीर्तिवर्धनसिंह:, पेट्रोलियम एवं प्राकृतिक गैस राज्य मन्त्री सुरेश गोपी, केरलस्य मुख्यमन्त्री पिनाराई विजयन अथ तस्य सहयोगी राज्ये विधानसभायां विपक्षीय नेता वी.डी. सतीसन एवञ्च भाजपेति दलस्य प्रदेश अध्यक्ष: के. सुरेन्द्रन: च श्रद्धांजलिं अयच्छत्।

## शतरंज

भारत-देशस्य दिव्या-देशमुख: गुजरातस्य गाँधीनगरे विश्व कनिष्ठ बालिका-शतरंज-प्रतिस्पर्धायां विजयं प्राप्तवती। दिव्या अन्तिमचक्रे केवलं षड्विंशति: चालनेषु बुल्गारिया-देशस्य बेलोस्लावा क्रेस्टेवां पराभूय प्रथमं स्थानं अवाप्तवती।

।। इति वार्ता: ।।